दिनाङ्क:-09.01.2026

प्रात: - 06:55

<u>कृत्रिम-बुद्धिमत्ता</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना समुदीरितं यत् भारतं एतादृशम् अपूर्वम् ए.आई. प्रारूपं प्रस्तुयाद्, येन भारते निर्मितं, विश्वाय निर्मितम्, इत्यस्य भावना प्रतिबिम्बिता भवेत्। गतदिने भारतीय-कृत्रिम-बुद्धिमत्ता-नवोद्योगैः सह राउंडटेबल-इत्याख्यस्य सम्मेलनस्य प्रधानमन्त्◌ी नरेन्द्रमोद◌ी अध्यक्षता◌ं कृतवान्। अग्रिमे मासे भारते आयोक्ष्यमाणात् ऐषमो भारतीय-कृत्रिम-बुद्धिमत्ता-प्रभाव-शिखर-सम्मेलनात् पूर्वं, द्वादश भारतीय-कृत्रिम-बुद्धिमत्ता-नवोद्योगाः ये “AI for All: Global Impact Challenge” इति वैश्विक-प्रभाव-समाह्वान-कार्यक्रमाय योग्यतां प्राप्तवन्तः, ते सम्मेलनेऽस्मिन् भाग◌ं निरवहन्। सभायां ते स्वविचारान् स्वकार्याणि च प्रस्तुतवन्तः। एता: नवोद्योग-संस्थाः व्यक्तिगत-विषयवस्तु-भारतीय-भाषा-आधारित-प्रतिरूपस्य, ई-वाणिज्यस्य, विपण्या:, उत्पादक-कृत्रिम-बुद्धेः च उपयोगेन थ्रीडी-विषयवस्तु-निर्माणम्, अभियान्त्रिक-अनुकरणानि, स्वास्थ्य-सेवायां निदानं, चिकित्सा-अनुसन्धानं च इत्यादिषु विविधेषु क्षेत्रेषु कार्यं कुर्वन्ति। सभायां प्रधानमन्त्री अवदत् यत् अग्रिमे मासे भारतं भारतीय-कृत्रिम-बुद्धि-प्रभाव-शिखर-सम्मेलनस्य आतिथ्यं करिष्यति। श्रीमोदी सबलम् उक्तवान् यत् नवोद्योगाः कृत्रिम-बुद्धिमत्ता-उद्यमिनः च भारतस्य भविष्यस्य सहनिर्मातारः सन्ति, अपि च देशे नवान्वेषणस्य बृहदाकार-कार्यान्वयनस्य च बहव्य: सम्भावना: सन्ति।

<u>रेलमन्त्री</u>

रेलमन्त्री अश्विनी-वैष्णव: अद्य राजधान्यां नवदिल्ल्यां सप्ततितमान् अतिविशिष्ट सेवा पुरस्कारान् प्रदास्यति। विगतवर्षे विशिष्ट सेवा प्रदातृभ्य: एकशतं रेलविभागाधिकारिभ्य: इमे पुरस्कारा: प्रदास्यन्ते। पुरस्कार समारोहे रेलराज्य मन्त्रिणौ वी. सोमन्ना रणवीत सिंह: रेलवेबोर्ड इत्यस्य प्रमुख कार्य कार्यधिकारी सतीश कुमार: अन्ये च गणमान्या: अपि उपास्थिता: भविष्यन्ति।

गृहमन्त्री जम्मूकश्मीरः

केन्द्रीय-गृहमन्त्रिणा अमितशाहेन उक्तं यत् प्रशासनं जम्मू-कश्मीरे स्थायि-शान्तिं स्थापयितुम् आतङ्कवादं च समूलोन्मूलयितुं च प्रतिबद्धम् अस्ति। गृह-मन्त्री गतदिने राजधान्यां नवदिल्ल्यां जम्मू-कश्मीरस्य सुरक्षा-समीक्षोपवेशनस्य अध्यक्षताम् अकरोत्। श्रीशाहेन उक्तं यत् आतङ्कवाद-संरचनाम् आतङ्कवाद-वित्तपोषणं च विरुध्याभियानं सततं प्रवर्तते। प्रधानमन्त्रिणः नरेन्द्रमोदिना: नेतृत्व-युतस्य प्रशासनस्य निरंतरप्रयासै: जम्मूकश्मीरे आतङ्कवाद: पङ्गुतन्त्रं सञ्जातम्। गृहमन्त्रिणा जम्मूकश्मीरस्य सुरक्षास्थिते: दृढतायै सुरक्षाभिकरणानि प्रशंसितानि।

गडकरी चिकित्सोपचारः

पथपरिवहन-राजमार्ग-मन्त्री नितिन गडकरी अवोचत् यत् प्रधानमन्त्री नरेन्द्र-मोदी शीघ्रमेव मार्गदुर्घटना-पीडितेभ्यः कैशलेस इति रोक्कसहित-चिकित्सोपचार-योजनाम् आरप्स्यति। पथपरिवहन-राजमार्ग-मन्त्रिणा नितिन-गडकरी-वर्येण गतदिने राजधान्यां नव-दिल्ल्यां समेषां राज्यनां केन्द्र-शासित-प्रदेशानां च परिवहनमन्त्रिणां परिवहन-विकास-परिषदः च त्रिचत्वारिंशोपवेनस्य अनन्तरं वार्ताहर-सम्मेलने एतत् विवरणम् उपस्थापितम्।

तेनोक्तं यत् अस्यां योजनायां मार्ग-दुर्घटना-पीडितेभ्यः न्यूनातिन्यूनं सप्तदिवसेभ्यः सार्धैकलक्ष-रूप्यकाणां रोक्करहितचिकोत्सोपचारः प्रदास्यते। मार्ग-दुर्घटना-पीडितान् चिकित्सालयं प्राप्तवद्भ्यः साहाय्यकर्तृभ्यः पञ्चविंशति-सहस्ररूप्यकाणां पुरस्कारः प्रदास्यते। श्री गडकरी अवोचत् यत् इयं परियोजना उत्तर-प्रदेश-हरियाणा-पञ्जाब-चंडीगढ-राज्यानि समेत्य विविध-राज्येषु केन्द्र-शासित-प्रदेशेषु च सफलतापूर्वकं सम्पन्ना जाता।

विकसितभारत-युव-नेतृ-संवादः

ऐषमो विकसितभारत-युव-नेतृ-संवाद-कार्यक्रमः अद्य नवदिल्ल्यां भारत-मण्डपम-प्राङ्गणे आरभते। चतुर्दिवसीयः अयं कार्यक्रमः सोमवासरे जनवरी द्वादश्यां पूर्णो भविष्यति। अस्मिन्

कार्यक्रमे देश-विदेशेभ्यः सार्धद्विसहस्र-युवानः सम्मिलिताः भविष्यन्ति। क्रीडा युव-प्रकरणानां मन्त्री डॉ. मनसुख मांडविया अवदत् यत् कार्यक्रमः यूनः अग्रे आगत्य नेतृत्वं कर्तुम् समाह्वानानि सम्मुखीकर्तुं देशस्य भविष्य-निर्माण-रूपरेखां निर्मातुं च योगदानाय सशक्तं करिष्यति। तेनोक्तं यत् अस्मिन् कार्यक्रमे सम्पूर्ण-देशस्य युव-नेतारः प्रधानमन्त्रिणा नरेन्द्र-मोदिना सह विकसित-भारतस्य दृष्टिकोणे विचार-विमर्शं करिष्यन्ति।

## बैडमिंटन

बैडमिंटन-क्रीडायाम् भारतीय-क्रीडिका पी. वी. सिन्धुः कुआलालंपुरे मलेशिया-मुक्त-बैडमिंटन-प्रतियोगितायाः प्रागुपान्त्य-चक्रे प्रविष्टा। तया जपान-देशस्य टोमोको-मियाज़ाकी इत्येता द्वाविंशतिः-अष्ट, एकविंशतिः-त्रयोदश अङ्कैः पराजिता। पुरुषयुगलवर्गे सात्विकसाईराज-चिरागशेट्टी इत्यनयोः दलमपि प्रागुपान्त्यचक्रे प्रविष्टम्।